UGC CARELISTED
ISSN : 2248-9495
Vol. - XVII, 2020-21

# जयन्ती

# JAYANTĪ

सान्दर्भिक–पुनरीक्षितवार्षिकशोधपत्रिका

**Refereed and Peer Reviewed Annual Research Journal**

योऽनूचानः स नो महान्।

केन्द्रीयसंस्कृतविश्वविद्यालयः

## केन्द्रीयसंस्कृतविश्वविद्यालयः

जयपुरपरिसरः, जयपुरम्

# * अनुक्रमणिका *

## * संस्कृतखण्ड *


| | | | |
|---|---|---|---|
| 1. | तिथिनिर्णये साकल्यापादनसिद्धान्तस्य उपादेयता | प्रो. भगवतीसुदेशः | 5 |
| 2. | आधुनिकयुगे जैनदार्शनिकचिन्तनस्य प्रासङ्गिकता | प्रो. श्रीयांशकुमारसिंघई | 17 |
| 3. | सरूपाणामेकशेष एकविभक्तौ इति सूत्रस्य समीक्षणम् | डा. रामनेवाज पाण्डेयः | 21 |
| 4. | शृङ्गारप्रकाशे तात्पर्यसाहित्यम् | प्रो. रामकुमारशर्मा | 26 |
| 5. | पारम्परिकशिक्षाया औचित्यम् | प्रो. फतहसिंहः | 33 |
| 6. | स्मृतिषु न्यायव्यवस्था दण्डनीतिश्च | प्रो. सन्तोषमित्तलः | 37 |
| 7. | कृत्प्रत्ययविचारः | प्रो. श्रीधरमिश्रः | 42 |
| 8. | क्रियायोगविमर्शः | प्रो. सत्यम्कुमारी | 48 |
| 9. | अभिनवचन्द्रिकाकर्तुर्दण्डिभट्टस्य चिन्तनम् | प्रो. विष्णुकान्तपाण्डेयः | 51 |
| 10. | शृङ्गारप्रकाशे रतिः | डा. किशोरकुमारदलाई | 56 |
| 11. | ज्यौतिषे आयुर्विज्ञानम् | डा. विष्णुकुमारनिर्मलः | 61 |
| 12. | धर्ममूलं वेदः | डॉ. शत्रुघ्नपाणिग्राही | 67 |
| 13. | अभिनवदृष्ट्या प्रत्यक्षप्रमाणम् | बी. उमामहेश्वरी | 74 |
| 14. | आधुनिकव्याकरणरूपे पाणिनीयव्याकरणम् | प्रो. कुलदीपशर्मा | 78 |
| 15. | भाषाया अर्थः प्रकृतिश्च | डॉ. शीशरामः | 82 |
| 16. | मीमांसादर्शने प्रबन्धनतत्त्वानि | डॉ. पवनव्यासः | 89 |
| 17. | पाणिनिव्याकरणस्य परिचयः (पञ्चाङ्गं व्याकरणम्) | डॉ. महेशकुमारद्विवेदी | 94 |
| 18. | शृङ्गारप्रकाशे शब्दविवेचनम् | डॉ. हिम्मतलालशर्मा 'हेमन्तः' | 98 |
| 19. | सनातनधर्मे यज्ञस्वरूपम् | डॉ. कृष्णा शर्मा | 103 |
| 20. | काव्यकारणविवेचनसन्दर्भे काव्यप्रकाशाऽलङ्कारमहोदधिग्रन्थयोः सिद्धान्तमीमांसा | डॉ. राधावल्लभशर्मा | 111 |
| 21. | भट्टनागेशरीत्या व्यञ्जनातत्त्वविमर्शः | सुश्रीविदुषी बोल्ला | 124 |
| 22. | शैक्षिकप्रविधौ मूक्स (moocs) इत्यस्य महत्त्वम् | डॉ. अञ्जू चौधरी | 129 |
| 23. | निर्णयसिन्धौ उक्तानि कलिवर्ज्याणि | डॉ. मनोजकुमारसाहुः | 132 |
| 24. | जीवनशक्तेः विकासः | डॉ. बलबीरसिंहमीणा | 134 |
| 25. | साहित्यकण्ठाभरणोक्तदिशा लक्षणावृत्तिविमर्शः | रामजीलालमीणा | 138 |
| 26. | पउमचरिये मानवमूल्यं तस्योपयोगिता च | डॉ. प्रभातकुमारदासः | 143 |
| 27. | नैषधीयचरिते बिम्बविधानविमर्शः | डॉ. स्नेहलता शर्मा | 146 |
| 28. | निम्बार्कवेदान्ते मोक्षसाधनविमर्शः | डॉ. रुम्पा सरकारः | 150 |
| 29. | योगनये धर्मादित्रयपरिणामविचारः | डॉ. अशोककुमारमीना | 153 |

| | | | |
|---|---|---|---|
| 30. | अलङ्कारनिर्वचनम् | डॉ. कृष्णकुमारकुमावतः | 157 |
| 31. | अद्वैतवेदान्ते 'तत्त्वमसि' महावाक्यम् | डॉ. चेतनकुमारः | 163 |
| 32. | श्रीगङ्गासहायशिशुविरचितस्य कविकण्ठाभरणस्य प्रतिपाद्यविषयः | मधुसूदन शर्मा | 166 |
| 33. | आचार्यभवभूतेः रूपकेषु वात्सल्यसमीक्षा शैशवचित्रणं च | डॉ. चन्द्रकान्तदत्तशुक्लः | 169 |
| 34. | अहिबलचक्रप्रयोजनंद्रव्यादिविचारश्च | डॉ. सुभाषचन्द्रमिश्रः | 180 |
| 35. | छन्दोभ्य एव विश्वमिदं व्यावर्तत | अभिषेककुमारः | 184 |
| 36. | स्फोटतत्त्वविमर्शः | खुशबू कुमारी | 186 |
| 37. | पर्यावरणस्य आद्यप्रवाचका वेदाः | सूर्या कुमारी | 189 |
| 38. | उच्चशिक्षायां विद्यार्थिनां भविष्यनिर्माणे समागतमानसिकासन्तुलनस्य निवारणे अध्यापकविद्यालययोर्भूमिका | राजेन्द्रप्रसादरैगरः | 194 |
| 39. | मुदितमदालसायाः चतुर्थाङ्कस्य वैशिष्ट्यम् | समुन्दरसिंहः | 197 |
| 40. | अद्यतने विवाहसंस्कारस्य प्रासंगिकता | अंजली गौतमः | 200 |
| 41. | ज्योतिषशास्त्रे कृषिजलस्वरूपस्य विचारः | रणसिंहजाटः | 203 |
| 42. | शारीरिकमानसिकविकासक्रमे क्रीडाशिक्षायाः महत्त्वम् | रामकंवार मीना | 209 |
| 43. | किशोरावस्थायां भाषाधिगमः संस्कृतश्च (Language Learning in -dolescence and Sanskrit) | डॉ. कुलदीपसिंहः | 212 |
| 44. | व्यक्तित्वस्य विविधविचाराणां समन्वयः | ज्योत्सना कुमारी वर्मा | 216 |
| 45. | समासशक्तिनिर्णयः | रामबाबूपाण्डेयः | 220 |
| 46. | वैदिकलौकिकव्याकरणयोः तुलनाः | राज शर्मा | 229 |
| 47. | भारतीयसंस्कृतौ वर्णाश्रमव्यवस्थाया महत्त्वम् | सत्यव्रतमिश्रः | 231 |


**❊ हिन्दी खण्ड ❊**


| | | | |
|---|---|---|---|
| 48. | महाकवि माघ के काव्य की शब्दार्थरमणीयता | प्रो. अर्कनाथ चौधरी | 238 |
| 49. | संस्कृतसाहित्य में महाराणा प्रताप वर्णन | प्रो. रमाकान्त पाण्डेय | 243 |
| 50. | आचार्य विद्यासागर प्रणीत संस्कृत साहित्य में प्रयुक्त दृष्टान्त और उनका महत्त्व | प्रो. कमलेश कुमार जैन | 253 |
| 51. | आधुनिक शैक्षिक परिप्रेक्ष्य में सांख्य दर्शन | प्रो. लीना सक्करवाल | 263 |
| 52. | हिन्दी उपन्यास लेखन पर संस्कृत साहित्य का प्रभाव | डॉ. रेखा पाण्डेय | 272 |
| 53. | उपेक्षित वर्गों के मानव अधिकार | डॉ. सीमा अग्रवाल | 277 |
| 54. | जैनदर्शन का द्रव्यसम्बन्धी विचार (शैक्षिक योगदान) णमो अरिहंताणं... (The Jaina Theory of Substance : Educational Contribution) | डॉ. हरिओम शर्मा | 288 |
| 55. | जीवन मूल्य, काव्य-कथाएँ और राम | मनोज कुमार राघव | 294 |
| 56. | मनुस्मृति में कालपरिमाण | डॉ. विजेन्द्र कुमार शर्मा | 299 |
| 57. | महाकवि माघविरचित शिशुपालवध महाकाव्य में उदात्त-संदेश | डॉ. राकेश कुमार जैन | 302 |

| | | | |
|---|---|---|---|
| 58. | रंगमंच एवं संस्कृत नाट्य-साहित्य | डॉ. विशाल भारद्वाज | 311 |
| 59. | भारतीय संस्कृति में पाण्डुलिपि-संग्रह एवं उसका महत्त्व | डॉ. सुमत कुमार जैन | 318 |
| 60. | कण्हचरियं में वर्णित राजीमती कथानक एवं व्यावहारिक उपयोगिता | रेखा जैन | 325 |
| 61. | ज्योतिर्विज्ञान में दकार्गल विमर्श | डॉ. नवनीत कुमार | 333 |
| 62. | आत्मनिर्भर भारत की स्वतंत्र विदेश नीति | डॉ. विनी शर्मा | 337 |
| 63. | ब्रह्मगायत्री रहस्य | डॉ. धर्मेन्द्र कुमार पाठक | 344 |
| 64. | संस्कृति संरक्षण में ज्योतिष एवं धर्मशास्त्र की भूमिका | डॉ नीरज त्रिवेदी | 348 |
| 65. | संस्कृतवाङ्मय में अङ्कन | ज्ञानसिन्धु, डॉ. पवनव्यास | 352 |
| 66. | उदात्तादि स्वरों का माहात्म्य | डॉ. पंकज पुरोहित | 356 |
| 67. | यज्ञ का स्वरूप एवं प्रकार | प्रकाश रंजन मिश्र | 359 |
| 68. | गांधीवाद एवं भारत | डॉ. ज्योति गुप्ता | 362 |
| 69. | संस्कृत काव्यशास्त्र में गुण स्वरूप विमर्श | डा. बाबूलाल मीना | 368 |
| 70. | नाटककार भवभूति की कृतियों में वर्णित यज्ञ का महत्त्व | डॉ आशा सिंह रावत | 373 |
| 71. | संस्कृत वाङ्मय में शक्ति तत्त्व का निरूपण | डॉ. देवेश कुमार मिश्र | 378 |
| 72. | ग्रहण का शुभाशुभ फल विचार | सीताकान्त कर | 386 |
| 73. | अलिविलासिसंलाप में वर्णित चार्वाक दर्शन | डॉ. वन्दना | 394 |
| 74. | कोरोना काल में परिवर्तित शिक्षा व्यवस्था | डॉ रेखा शर्मा | 402 |
| 75. | नन्दीसूत्र में सर्वज्ञ की अवधारणा | डा. अमित कुमार | 407 |
| 76. | भारतीय दर्शनों में मोक्ष प्राप्ति के उपाय | डॉ. निर्मला भास्कर, डॉ. अशोक भास्कर | 410 |
| 77. | कथाकुसुमम्-आधुनिक संस्कृत साहित्य की प्रथम बाल-साहित्य रचना | सपना | 415 |
| 78. | सुभाषितसर्वस्वम् : मातृकापरिचयः, ग्रन्थकारः, ग्रन्थप्रतिपाद्यञ्च | मुरलीधरः पालीवालः | 420 |
| 79. | भगवद्गीता में कर्ममीमांसा | डॉ. सुधीर कुमार शर्मा | 424 |

**✲ आङ्ग्लभाषाखण्डः ✲**

| | | | |
|---|---|---|---|
| 80. | Relevance of Magha's Shishupalavadha in Contemporary Public Administration. | Dr. Shalini Chaturvedi, Gopesh Sharma | 430 |
| 81. | Arya Samaj and Dayanand's Doctrines serving as Precursor of Indian National Movement | Dr. Meghna Sharma | 439 |
| 82. | The Functions & Principles of Evaluation in Education | Dr. Daryao Singh | 453 |
| 83. | Education: The most serious sufferer during Covid times | Dr. Laxmi Sharma | 456 |
| 84. | YOGA | Dr. Anita Swami | 460 |

# सुभाषितसर्वस्वम् : मातृकापरिचयः, ग्रन्थकारः, ग्रन्थप्रतिपाद्यश्च

मुरलीधरः पालीवालः

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।**
**तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम्।।**

मधुरतमायाः संस्कृतभाषायाः सर्वाधिकं माधुर्यं सुभाषितेषु प्राप्यते। सुष्ठ भाषितं सुभाषितमिति उच्यते। मनुष्यस्य सर्वविधकल्याणाय जीवनपथप्रदर्शकानि सुभाषितानि भवन्ति। संस्कृतसाहित्यस्य रत्नस्वरूपाणि नवनीततुल्यानि च भवन्ति इमानि सुभाषितानि। अतः एतेषां सङ्कलनम् अतीव महत्त्वपूर्णमस्ति। यथोक्तं महाभारते–

**सुव्याहृतानि सूक्तानि सुकृतानि ततस्ततः।**
**सञ्चिन्वन् धीर आसीत् शिलाहारी शिलं यथा।।**[2]

संस्कृतसाहित्यस्य प्राचीनतमः सुभाषितग्रन्थः विद्याधरपण्डितसङ्कलितः सुभाषितरत्नकोषः (1100 ख्रिष्टाब्दः) वर्तते।[3] अस्यापरं नाम कवीन्द्रवचनसमुच्चय इत्यपि अस्ति । तत्पश्चात् सुभाषितग्रन्थानाम् एका सुदीर्घा परम्परा प्राप्यते। अस्यामेव परम्परायां वर्तते शोधपत्रस्याधारभूतं श्रीगोपीनाथविरचितं सुभाषितसर्वस्वनामकं ग्रन्थरत्नम्। पाण्डुग्रन्थोऽयं सर्वथा अप्रकाशितो वर्तते। ग्रन्थस्यास्य पञ्च मातृकाः शोधकर्त्रा अधिगताः। तत्र तिस्रः पूर्णाः, एक अपूर्णा, एका च अर्धलुप्तपृष्ठा वर्तते। एतासां संक्षिप्तपरिचयः इत्थमस्ति–

| क्र.स. | प्राप्तिस्थलम् | सङ्केताक्षरः | ग्रन्थाङ्कः | पत्राणि | प्रतिपृष्ठं पङ्क्तयः | प्रतिपङ्क्तौ अक्षराणि | लिपिः | कालः | पूर्णापूर्णादिवाच्यम् | अन्यद्विवरणम् |
|---|---|---|---|---|---|---|---|---|---|---|
| १ | महाराजासयाजीराव-विश्वविद्यालयस्य केन्द्रीयपुस्तकालयः, बडौदा | B | ११५९२ | ४५ | ९ | ३६ | देवनागरी | अज्ञातः | आदिमध्यावसानेपु लुप्तपृष्ठा | |
| २ | राजस्थान-प्राच्यविद्या-प्रतिष्ठानम्, शाखा-उदयपुरम् | U | ६३४६ | ६३ | १२ | २९ | देवनागरी | चैत्रशुक्ला एकादशी, १८२३ वि. सं. | पूर्णा | श्रीकुशालीरामजीद्विजेन्द्रैः केशवचरणसन्निधौ पत्तनपुरमध्ये लिखायितं |
| ३ | भण्डारकर-प्राच्यविद्या-प्रतिष्ठानम्, | P | ८२०/१८८६-९२ | ८१ | १२ | २४ | देवनागरी | अज्ञातः | पूर्णा | श्रीकुशालीरामेण मौल्येन गृहीतम् |
| ४ | राजस्थान-प्राच्यविद्या प्रतिष्ठानम्, शाखा-जयपुरम् | J | ५०१/६६८ | ८८ | ६ | ४३ | देवनागरी | १९ शतकम् | पूर्णा | |
| ५ | राजस्थान-प्राच्यविद्या-प्रतिष्ठानम्, शाखा-जयपुरम् | J-1 | ५०१/६६८ | ४ | ८ | ४४ | देवनागरी | १९ शतकम् | अपूर्णा | |

**मातृकाणां विषये विशिष्टतथ्यानि–**

1. B–मातृका प्राचीनतमा प्रतीयते। एषा शुद्धतमा अधिकांशपद्यानां सन्दर्भप्रदात्री चास्ति। अस्यां बकारस्य स्थाने वकारो लिख्यते। अस्याः लेखनानन्तरं संशोधनमपि कृतमस्ति।
2. U,P मातृके पाठदृष्ट्या प्रायेण समाने स्तः। P– मातृकामाश्रित्य U– मातृका निर्मिता वर्तते
3. J- मातृका P–मातृकामाश्रित्य निर्मिताऽस्ति। एषा अशुद्धतमा अस्ति।
4. सर्वासु मातृकासु 'छे च 6/1/71' सूत्रेण विधीयमानस्य तुँगागमस्य अनुपयोगः दृश्यते।
5. सर्वासु मातृकासु पूर्वसवर्णदीर्घादिसन्धिषु अवग्रहचिह्न न दृश्यते ।
6. हलन्त–मकारस्य स्थाने सर्वत्र अनुस्वारस्य प्रयोगः प्राप्यते।

**मातृकाणां वंशवृक्षपरिचयः**




**ग्रन्थकारः**

सुभाषितसर्वस्वम् इत्यस्य सङ्कलितग्रन्थस्य रचयिता श्रीगोपीनाथः वर्तते। ग्रन्थेऽस्मिन् प्राचीन–मध्ययुगीनकवीनां मनोरमपद्यैः सह ग्रन्थकर्तुरपि अनेकानि मौलिकपद्यानि सन्ति। ग्रन्थकारः स्वयं श्रेष्ठकविः। ग्रन्थकारस्य रघुपतिविजयम् इत्यपरं काव्यमपि सम्भाव्यते।[4]

ग्रन्थकर्तुः देशविशेषः कालविशेषः च अज्ञातप्रायः। तथापि सुभाषितसर्वस्वे अकबरीयकालिदास्यस्य (मूलनाम्नः गोविन्दभट्टस्य) पद्योद्धृतत्वात्[5] ग्रन्थकारस्य कालः सप्तदश–शताब्दी अनुमीयते। यतो हि अकबरीयकालिदासः अकबरस्य (शासनावधिः 1556–1605 ख्रिष्टाब्दः)[6] राज्याश्रितः कविः आसीत्।[7] पुनश्च सुभाषितसर्वस्वस्य प्रतिलिपिकारेणापि 1766 ख्रिष्टाब्दे U– मातृका निर्मिताऽस्ति।

**ग्रन्थप्रतिपाद्यम्**

सुभाषितसर्वस्वग्रन्थः एकः सङ्कलितग्रन्थः वर्तते, यत्र संस्कृतसाहित्यस्य काव्य–नाटक सुभाषित ज्योतिष–शकुन–धर्मशास्त्र–राजनीतिशास्त्र–आयुर्वेदादिग्रन्थेभ्यः विविधानि रमणीयानि पद्यानि सङ्कलितानि सन्ति। प्रायेण संस्कृतसाहित्यस्य सर्वेषां प्रसिद्धकवीनां पद्यानि अस्मिन् विलसन्ति। मध्यकालस्य बहूनामज्ञातकवीनां, विकटनितम्बादिकवयित्रीणामपि च पद्यानि अत्र सन्ति । ग्रन्थकारस्याऽपि विविधप्रकरणेषु स्वरचितानि पद्यानि सम्मिलितानि सन्ति । ग्रन्थे पद्यसंख्या 814 वर्तते।।

ग्रन्थोऽयं तिसृषु पद्धतिषु विभक्तः वर्तते– धर्मपद्धतिः, अर्थपद्धतिः, कामपद्धतिश्च। ग्रन्थारम्भे मङ्गलाचरणरूपेण नटराजस्य शिवस्य स्तुत्यनन्तरं द्वितीयपद्ये ग्रन्थप्रयोजनं विनिर्दिष्टमस्ति–

**उधृत्य सर्वसारं ग्रन्थानालोक्य सर्वशः सुमतिः।**
**कोऽपि सुभाषितमेतत्पण्डितमुखमण्डनं कुरुते।।**[8]

एवमत्र ''यत्सारभूतं तदुपासनीयम्''[9] इति नीत्या सहृदयानां वाणीविलासो विहितः।

धर्मपद्धतेः आशीर्नाम्नि प्रथमप्रकरणे विविधदेवानां स्तुतिपरकाणि पञ्चाशत्पद्यानि विराजन्ते। द्वितीयप्रकरणे सुभाषितप्रशंसायामष्टौ पद्यानि सन्ति। सुभाषितमहत्त्वं द्योतयन् कश्चन श्लोकः प्रस्तूयते–

**प्रस्तावे यः सभामध्ये भाषते न सुभाषितम्।**
**विदुषस्तस्य धिग्गृत्वं पलाशफलसन्निभम्।।**[10]

अग्रिमप्रकरणानां विषयाः इमे सन्ति – कविप्रशंसा, सज्जनः, सत्सङ्गः, गुणी, गुणज्ञः, विचक्षणः, विवेकी, सन्तोषी, वत्सलः, धीरः, शूरः, अहङ्कारी, समर्थः, स्वजनप्रशंसा, कृतज्ञः, दाता, उदारः, विद्या, महान्, क्षमा, पात्रविशेषः, सुभगः, निपुणः, पाक्षिकः, स्नेही, दृढाङ्गीकारः, दुर्जनः, असत्सङ्गः, क्षुद्रः, निर्गुणः, गुणनिन्दा, अगुणज्ञः, अज्ञः, अविवेकी, अविशेषज्ञः, ग्रामस्थानम्, कृपणः, अदाता, अनुपयुक्तपवनः, अनुपयुक्तवर्षी, पात्रपरित्यागी, अप्राप्तदानः, नीचसंग्रही, वञ्चकः, आशाहरः, दूषकः, धृष्टः, निर्लज्जाः, अपकारी, नाशकम्, कृतघ्नः, दोषग्राही, कातरः, अपालकः, व्यसनी, दुर्भगः, मिथ्यासेवी इत्यादयः। एवमस्यां पद्धतौ पञ्चषष्टिप्रकरणेषु 340 पद्येषु च धर्माधर्मयोः विविधलक्षणानां सुभाषितशैल्यां विवेचनं कृतमस्ति।

ग्रन्थस्य द्वितीया अर्थपद्धतिः अर्थशास्त्रस्य परिभाषावदेवास्ति– ''**मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः। तस्याः पृथिव्या लाभपालनोपायः शास्त्रमर्थशास्त्रमिति।**[11] पद्धतिरियं मुख्यतया राजनीतिसम्बद्धा वर्तते । उक्तश्च आचार्यचाणक्येनापि– **सुखस्य मूलं धर्मः। धर्मस्य मूलमर्थः। अर्थस्य मूलं राज्यम्।**[12]

उपर्युक्तविवरणम् अस्याः पद्धतेः प्रकरणविषयान् दृष्ट्वा अवबोद्धं शक्यते– अर्थप्रशंसा, लक्ष्मीस्तुतिनिन्दे, राजनीतिः, स्वामी, मन्त्री, मित्रम्, देशः, भृत्यः, दूतः, स्वामिप्रसादः, सप्तव्यसनानि, साम भेद-दान-दण्डाः, दैवम्, उद्यमः, सेवा, दरिद्रवर्णनम्, राजदर्शनम्, आशीः, कीर्त्तिः, प्रतापः, खड्गः, चापः, युद्धवर्णनम्, पलायनम्, शत्रुपुरवर्णनम्, बन्दीकृतारिवर्णनम्, राजवर्णनम्, गजाश्वतुरगवर्णनम्, नगरी, उद्यानम्, मृगया, पुरुषलक्षणम्, भोज्यम्, ताम्बूलम्, जातिवर्णनम्, सुखप्रशंसा इत्यादयः। अस्यां पद्धतौ 47 प्रकरणानि 259 पद्यानि च सन्ति।

पद्धत्यामस्याम् आयुर्वेद-ज्योतिष-शकुन-शास्त्रसम्बद्धानि प्रकरणानि अपि सन्ति। प्रहेलिकाक्रियागुप्तकादिचक्रनामकेऽद्भुते प्रकरणेऽपि स्तः। ग्रन्थकर्तुः घट-प्रहेलिकाविषयकं पद्यमिदं द्रष्टव्यमस्ति–

**नित्यस्नायी न विप्रोऽसौ कान्ताश्लेषी न कामुकः।**
**दुर्गस्थो न पुनर्भूपो यो जानाति स पण्डितः।।**[13] **घटः।। श्रीगोपीनाथस्य ।।**

ग्रन्थस्य तृतीया कामपद्धतिः शृंगाररसपूर्णा वर्तते। अस्यां पद्धतौ 70 प्रकरणानि 215 पद्यानि च सन्ति। अत्र शृंगारस्य सम्भोग-विप्रलम्भाख्ययोः उभयोरपि भेदयोः सम्बद्धानि पद्यानि प्राप्यन्ते। नायक नायिका-

सखी-दूतीनां प्रायः समग्रव्यवहारः अत्रावलोकयितुं शक्यते। स्त्रीवर्णनप्रसङ्गे नखशिखवर्णनं लभ्यते। षड्ऋतुवर्णनेन सह तेषां वायु-पथिकयोरपि रमणीयवर्णनं प्राप्यते। दोला-कन्दुक जलक्रीडासम्बद्धानि पद्यानि अपि सन्ति। सर्वासु पद्धतिषु कामपद्धतावेव ग्रन्थकारस्य श्रीगोपीनाथस्य अधिकानि पद्यानि विलसन्ति । शिशिरऋतुं वर्णयतः कवे सुन्दरपद्यमिदम्–

**वनमखिलं निःकुसुमं कथमपि शिशिरप्रसादतो जातम्।**
**वामे विधौ विरहिणां मदनास्त्रं कुन्दकलिकाऽऽसीत्।।**[14] श्रीगोपीनाथस्य ।।

एवं श्रीगोपीनाथविरचितं त्रिपद्धतिषु विभक्तं सुभाषितसर्वस्वं सरसरीत्या सहृदयानां त्रिवर्गसाधनस्य पन्थानं प्रशस्तीकरोति। सुभाषितरसास्वादपिपासकैः सकलकाव्यप्रयोजनसम्पादकः ग्रन्थोऽयम् अवश्यं पठनीयः स्यात्।

**संदर्भाः –**


1. सुभाषितरत्नभाण्डागारम्,
2. विदुरनीतिः, 2/33
3. संस्कृतसाहित्य का इतिहास, बलदेव-उपाध्यायः:पृ. 314
4. संस्कृत-वाङ्मय-कोशः, श्रीधरभास्करवर्णेकरः,
5. सुभाषितसर्वस्वम्, 1/1/
6. htttps//hi.m.wikipedia.org
7. महासुभाषितसंग्रहः, वॉल्यम-1, पृ. 319
8. सुभाषितसर्वस्वम्, 1/1/2
9. चाणक्यनीतिदर्पणः, 15/10
10. सुभाषितसर्वस्वम्, /2//
11. कौटिलीयम् अर्थशास्त्रम्, ।। -2
12. चाणक्यसूत्राणि, -/
13. सुभाषितसर्वस्वम्,
14. सुभाषितसर्वस्वम्, 3/शिशिरः/2



*सहायकाचार्यः*

*संस्कृतविभागः मोहनलालसुखाडियाविश्वविद्यालयः,*

*उदयपुरम्*